दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् आश्विन् कृष्णप्रतिपदा
आश्विन् 11 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-09 ■ वर्ष-5 ■ अङ्क-338 | 1 | सितम्बर 27, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 दीपावल्याः पूर्वं कर्मचारिभ्यः लप्स्यते महार्घतावृतेः; अवशिष्टांशम् मुख्यमन्त्री सुक्खूमहोदयेन बल्हक्षेत्राय विहिताः विपुलाः विकासात्मक-उद्घोषणाः

4 नेरचौक- आयुर्विज्ञान-महाविद्यालयाय महदोपहारः, त्रयोविंशति-कोटि-रूप्यकाणां (२३) एमआरआई- यन्त्रस्य शुभारम्भः

8 भारत-नेपाल-सीमायां चौरप्रवेशम्, कूटलेख्यम्, अवैधवाणिज्यं च रोद्धुं केन्द्र-बिहार-सर्वकारौ संयुक्तरूपेण कार्यं करिष्यतः

## अद्य रविवासरे सर्वाणि सार्वजनिकक्षेत्रस्य अधिकोषाः क्षेत्रीय-ग्रामीण-अधिकोषाश्च उद्घाटिताः भविष्यन्ति : वित्तमन्त्रालयः




वित्तमन्त्रालयेन उद्घोषितं यत् ग्राहकाणां सौकर्यार्थं अद्य रविवासरे सर्वाणि सार्वजनिकक्षेत्रस्य अधिकोषाः क्षेत्रीय-ग्रामीण-अधिकोषाश्च उद्घाटिताः स्थास्यन्ति। एषः निर्णयः अधिकोष-कर्मचारि-सङ्घानां संयुक्तेन मञ्चेन 'यूनाइटेड फोरम ऑफ बैंक यूनियन्स' इत्यनेन सितम्बर-मासस्य अष्टाविंशतितम-दिनाङ्कतः त्रिंशत्-दिनाङ्कं यावत् प्रस्तावितां देशव्यापिनीं कार्यविराम-आन्दोलनम् (हड़ताल) अवलोक्य स्वीकृतः। भारतीय-रिज़र्व-अधिकोषेण रविवासरे सर्वासां अधिकोष-शाखानाम्, कार्यालयानाम्, स्वचालित-गणक-यन्त्र (एटीएम) सम्बद्ध-शाखानाम्, तथा च अधिकोषेभ्यः स्वचालित-गणक-यन्त्रेभ्यश्च मुद्रावितरणाय मुद्रा-कोषागाराणां (करेंसी चेस्ट) पूर्णतया कार्यक्षम-सञ्चालनार्थम् अनुमतिः प्रदत्ता। एतन्मध्ये, सार्वजनिकक्षेत्रस्य बहुभिः अधिकोषैः कार्यविराम-आन्दोलनस्य अवधौ स्वचालित-गणक-यन्त्रेभ्यः प्रतिमासं विहित-निःशुल्क-सीमया अधिकवारं क्रियमाणस्य मुद्रा-आहरण-व्यवहारस्य शुल्कं क्षमापयितुं निर्णयः गृहीतः।

## अद्यतनीयं सुभाषितम्

**देवतासु गुरौ गोषु राजसु ब्राह्मणेषु च।**
**नियन्तव्यः सदा कोपो बालवृद्धातुरेषु च।।**
हितोपदेशः विग्रह- १२०)

भावार्थः- अर्थात्- देवता, गुरु, गाय, राजा, ब्राह्मण, बालक, बूढ़ा और रोगी इन पर क्रोध नहीं करना चाहिए।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## विदेश-मन्त्री डॉ एस. जयशङ्करः ए आई माध्यमेन निर्मितानां अवसरानाम् उपयोगाय, सम्बद्ध-सङ्कटान् निवारणाय आहूतवान्



विदेश-मन्त्री डा. एस्. जयशङ्करः ए. आई. माध्यमेन प्राप्त-सम्भावनानां उपयोगस्य, परिणामानां पूर्वानुमानस्य, सङ्कटानां शमनस्य च आवश्यकतायाः विषये अवधानं दत्तवान्। मन्त्रिणा इदं वक्तव्यं, ग्रीस-देशस्य विदेशमन्त्रिणा जॉर्ज गेरापेट्राइटिस इत्यनेन सह, 'अन्ताराष्ट्रिय-शान्तेः सुरक्षायाः च सन्दर्भे ए. आई. इत्यस्मिन् विषये आयोजिते कार्यक्रमे सह-अध्यक्षतावधौ प्रदत्तवान्। कार्यक्रमस्य समये डा. जयशङ्करः पुनः दृढीकृतवान् यत् संयुक्तराष्ट्रसङ्घ भारतस्य प्राथमिकता ए. आई. तथा समुद्रीयसुरक्षयोः अस्ति। सः अधोरेखितवान् यत् नव-दिल्ली-घोषणापत्रे ए. आई. संसाधनानां लोकतान्त्रिक-प्रवेशः, सुरक्षित-विश्वसनीय-प्रणाल्याः निर्माणं, मानव-क्षमतासु निवेशः, आर्थिकवृद्धेः सामाजिक-कल्याणस्य च कृते ए. आई. इत्यस्य उपयोगस्य च महत्त्वं वर्तते।

### श्रीजयशङ्करः न्यूयार्क-नगरे
## एकाशीतितमं संयुक्तराष्ट्रसङ्घस्य सामान्यसभां सम्बोधितवान्



विदेशमन्त्री एस्. जयशङ्करः न्यूयार्क-नगरे एकाशीतितमं संयुक्तराष्ट्रसङ्घस्य सामान्यसभायाः उच्चस्तरीयं सत्रं सम्बोधितवान्। संयुक्तराष्ट्रसङ्घस्य सामान्यसभायाः एकाशीतितमसत्रस्य विषयः "विश्वासस्य पुनःस्थापनम्, परिवर्तनस्य प्रबन्धनं एकः संयुक्तराष्ट्रसङ्घः" इत्यासीत्। सामान्यसभायां त्रिनवत्यधिकैकशत संयुक्तराष्ट्रसङ्घस्य सदस्यराष्ट्राणां अध्यक्षाः, प्रधानमन्त्रिणः, वरिष्ठप्रतिनिधयः च सम्मिलिताः भवन्ति, ये प्रमुखेषु अन्ताराष्ट्रियविषयेषु स्वप्राथमिकतां स्थितिं च निरूपयन्ति। संयुक्तराष्ट्रसङ्घस्यानुसारं, एकाशीतितमं सत्रं वैश्विकसहयोगस्य पुनरुत्थाने, सुस्थिरविकासलक्ष्याणां प्रगतिविषये, शान्तेः, गौरवस्य, समानतायाः च कृते सामूहिककार्यस्य प्रोत्साहने च केन्द्रितः वर्तते।



## विदेशसचिवः विक्रम मिस्री इत्येषः विकासशीलराष्ट्राणां कृते अधिकं स्वरं दातुं यू. एन. एस्. सी. इत्यस्य तात्कालिक-परिष्काराय आह्वतवान्

विदेशसचिवः विक्रम-मिस्री संयुक्तराष्ट्र परिषदः परिष्कारस्य आवश्यकतां प्रतिपाद्य विकासशील देशानां कृते प्रबल-प्रतिनिधित्वस्य महत्वं प्रबलं उक्तवान्। न्यूयॉर्क नगरे आयोजितस्य संयुक्तराष्ट्र-महासभायाः एकाशीति-तमस्य सत्रस्य-काले-ग्रुप-ऑफ-G-77 इत्यस्य विदेशमन्त्रिणां पञ्चाशत-तमे वार्षिकोपवेशने भारतीय विदेशसचिवेन मिस्री वर्येण वैश्विक-राष्ट्राः समाहूताः तथा च नियमपालकैः, नियम-निर्मातृभिः सामूहिक प्रयासाः कर्तव्याः इत्यपि प्रतिपादितम्।



# ईरान - हार्मुज-पुनरूद्घाटन-प्रस्तावः

यदि संयुक्तराष्ट्र-अमेरिका ईरानस्य तैलविक्रयेभ्यः प्रतिबन्धं निवारयति, नौसैन्य अवरोधः समापयति तथा च लेबनान देशस्य युद्धविराम-नीतिं पालयति तर्हि ईरानदेशः सप्ताहावधौ होर्मुज-जलसंधिं पुनरुद्घाटनयितुं तथा च निज-आणविक कार्यक्रम विषये सम्भाषणं पुनः प्रारब्धुं प्रस्तावः प्रस्तुतवान्। एतस्मिन् सन्दर्भे ईरानस्य विदेशमन्त्रिणा अब्बास अराघची वर्येण संयुक्त राष्ट्र- सुरक्षापरिषदि-वार्ताहरैः सह सम्भाषणे कथितम्। अमेरिकी राष्ट्रपतिना डोनाल्ड ट्रम्पेण ईरानस्य हार्मुज-जलसंधेः पुनरुद्घाटनस्य क्षेत्रे शत्रुतां समापयितुं प्रस्तावः निराकृतम्।



# उत्तरप्रदेशस्य, उत्तराखण्डस्य, छत्तीसगढस्य, मध्यप्रदेशस्य च केषुचित् भागेषु प्रचण्डवृष्टयै संचेतना प्रसारिता अस्ति

भारतीय ऋतुविज्ञान-विभागेन उत्तरप्रदेश-उत्तराखण्ड- छत्तीसगढ, मध्यप्रदेशेषु च केषुचित् भागेषु अतिवृष्टेः संभावना प्रकटिता। एतदतिरिच्य बिहार -हरियाणा-चण्डीगढ़-दिल्ली-हिमाचलप्रदेश-झारखण्ड-ओडिशा-पश्चिमबंगाल-सिक्किम राज्येषु अपि वृष्टेः पूर्वानुमानं प्रकाशितम्। उत्तरप्रदेशे त्रि-षष्टिः जनपदानि अतिवृष्ट्या प्रभावितानि सन्ति। अतिवृष्टेः पूर्वानुमान- कारणात् तत्रत्य विद्यालयाः, महाविद्यालयाश्च पिहिताः आसन्। सर्वेषु जनपदेषु प्रशासनेन उच्च-संचेतना अपि प्रसारिता। जनाः अपि अध्यर्थिताः यत्ते गृहात् बहिः मा गच्छन्तु। ओडिशा राज्ये अपि निरन्तर वृष्ट्या बहुषु भागेषु जलाप्लावन-सदृशी-स्थितिः समुत्पन्ना। बालासोर-भद्रक-जाजपुर जनपदानि जलपूर संकटं सम्मुखी कुर्वन्ति। तत्र अपि तीव्र-वृष्टेः अनुमानः अभिव्यक्तः। जलपूरस्थितिमालक्ष्य बिहार-राज्ये जन-जीवनं प्रभावितमस्ति। विगत-चतुर्दिवसेभ्यः मेघवर्षणेन नेपालदेशे बहवः नद्यः संकटचिन्हमतिक्रम्य प्रवहन्ति ।

# दीपावल्याः पूर्वं कर्मचारिभ्यः लप्स्यते महार्घतावृत्ते; अवशिष्टांशम् मुख्यमन्त्री सुक्खूमहोदयेन बल्हक्षेत्राय विहिताः विपुलाः विकासात्मक-उद्घोषणाः



**हिमसंस्कृतवार्ताः- मण्डी।** हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खू- महोदयः राज्यस्य कर्मचारिभ्यः दीपावली-पर्वणः पूर्वमेव महार्घता-वृत्तेः अवशिष्टांश-वितरणस्य स्पष्टं सङ्केतं दत्तवान्। शनिवासरे मण्डी-मण्डलस्य बल्ह-विधानसभाक्षेत्रान्तर्गते कंसा-चौकस्थाने विशालां जनसभां सम्बोधयता मुख्यमन्त्री अवदत् यत् केचन कर्मचारिणः डीए-राशेः याचनां कुर्वन्ति। साम्प्रतं प्रदेशस्य अर्थव्यवस्था क्रमेण सुदृढ़ा जायमाना अस्ति, सर्वकारः कर्मचारिणां याचनासु पूर्णतया संवेदनशीलः वर्तते। अस्य उत्सवावसरे कर्मचारिभ्यः अवश्यं संबलं लप्स्यते, येन तेषां दीपावली- महोत्सवः सानन्दं सम्पत्स्यते। मुख्यमन्त्रिणा उल्लिखितं यत् सर्वकारः आर्थिकस्थितेः उन्नयनेन सह कर्मचारिणां निवृत्तानां च देय-राशीनां शोधनाय निरन्तरं प्रयतते। सः पक्षम् अकरोत् यत् भ्रष्टाचारस्य द्वाराणि पिधाय सर्वकारेण अतिरिक्तराजस्वं सङ्गृहीतं, राज्यं च आत्मनिर्भरतां प्रति अग्रेसरं क्रियते।

## 'अपना परिवार सुखी परिवार' योजनायै महती उद्घोषणा

मुख्यमन्त्रिणा 'अपना परिवार सुखी परिवार' इति योजनायाः पात्रता-नियमेषु महत्त्वपूर्ण-परिवर्तनस्य घोषणा कृता। सः अवदत् यत् अस्याः योजनायाः लाभाय मनरेगा-योजनायां एक-दिन-कार्यस्य अनिवार्यः नियमः निष्कास्यते। सहैव पारिवारिक-आयसीमा पञ्चाशत्-सहस्र-रूप्यकेभ्यः (५०,०००) संवर्ध्य पञ्चसप्तति-सहस्र-रूप्यकाणि (७५,०००) विधास्यते। तेन प्रोक्तं यत् एकविंशति-वर्षाधिकाभ्यः समस्ताभ्यः पात्राभ्यः महिलाभ्यः प्रतिमासं १,५०० रूप्यकाणां वृत्तिः प्रदास्यते।

## बल्हविधानसभाक्षेत्राय विविधाः विकासपरियोजनाः

अस्मिन् मङ्गलावसरे मुख्यमन्त्रिणा बल्ह-विधानसभा- क्षेत्राय बह्व्यः विकासात्मिकाः घोषणाः कृताः

**विभागीय-कार्यालयाः-** नेरचौकनगरे जलशक्ति-विभागस्य, विद्युत्-मण्डलस्य मण्डल-कार्यालयौ आरक्षि- उप- अधीक्षकस्य कार्यालयश्च उद्घाटयिष्यन्ते।

**सेचन-पेयजल-व्यवस्थाः-** बल्हक्षेत्रे सेचन-पेयजल- परियोजनाभ्यः ३ कोटि-रूप्यकाणि स्वीकृतानि।

**क्रीडाङ्गणं मार्गाश्चः-** अवशिष्टपदार्थ- प्रबन्धन-स्थलाय १ कोटि-रूप्यकाणि, कंसा-क्रीडाङ्गणस्य जीर्णोद्धाराय ५० लक्ष-रूप्यकाणि, लोक-निर्माण-विभागस्य मार्गाणाम् अनुरक्षणाय च ३ कोटि-रूप्यकाणि प्रदत्तानि।

**मार्गदृढीकरणम्ः-** रिड़ू, नालू, सरयाडमार्गस्य पक्कीकरणाय ६० लक्षरूप्यकाणां वित्तीयप्रावधानं विहितम्।

**महिलामण्डलेभ्यः शिक्षणाय चः-** कार्यक्रमे उपस्थितेभ्यः प्रत्येकं महिलामण्डलाय पञ्चत्रिंशत्-पञ्चत्रिंशत्- सहस्ररूप्यकाणि (३५,०००) गुरकोटाग्रामे आगामि-शैक्षणिकसत्रात् 'सीबीएसई' विद्यालयस्य (CBSE School) प्रवर्त्तनम् उद्घोषितम्।

# मादकद्रव्यैः प्रभावितानां बालकानां सुरक्षा, चिकित्सा, पुनर्वासश्च सुनिश्चितः भवेत् : मुख्यन्यायाधीशः न्यायमूर्तिः सूर्यकान्तः

सर्वोच्चन्यायालयस्य मुख्यन्यायाधीशेन न्यायमूर्ति-सूर्यकान्तेन उक्तं यत् बालकेषु मादकद्रव्याणां व्यसनं केवलं जनस्वास्थ्यस्य विषयः न, अपितु बालसंरक्षणस्य विषयत्वेनापि द्रष्टव्यम्। सः अद्य पाटलपुत्रे (पटनायां) 'बाल्यकालस्य पुनर्प्रतिष्ठापनम्—मादकद्रव्याणां निवारणं तथा पालन-संरक्षणयोः आवश्यकेभ्यः बालकेभ्यः पुनर्एकीकरणम्' इति विषये आयोजितां संगोष्ठीं सम्बोधयति स्म। मुख्यन्यायाधीशः अवदत् यत् मादकद्रव्यैः प्रभावितानां बालकानां सुरक्षा, चिकित्सा, परामर्शः, पुनर्वासश्च सुनिश्चितः करणीयः। अपि च, तेभ्यः पुनरपि शिक्षायाः पारिवारिकजीवनस्य च सम्बन्धेभ्यः अवसराः दीयेरन्।सः प्रारम्भिकस्तरे एव हस्तक्षेपस्य महत्त्वं प्रतिपादयन् न्यवेदयत् यत् बालकेषु सङ्कटस्य संकेतानां समयपूर्वं ज्ञाने परिवारः, विद्यालयः, शिक्षकाः, स्वास्थ्यकर्मिणः, समुदायकार्यकर्तारश्च महत्त्वपूर्णां भूमिकां निर्वोढुं शक्नुवन्ति।न्यायमूर्तिना सूर्यकान्तेन पुनर्वासप्रक्रियायां शिक्षायाः सातत्यम्, सुरक्षितं पारिवारिकं वातावरणम्, यत्नपूर्वकं संरक्षणव्यवस्था च महत्त्वपूर्णा इति वर्णिता।

# हिमाचले जल-शक्तिविभागस्य ३९३ बाह्यस्रोत-कर्मचारिणां कृते एकवर्षीयं सेवाविस्तारम्; आदेशः निर्गतः




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशसर्वकारेण जलशक्तिविभागे कार्यरतानां ३९३ बाह्यस्रोत-तान्त्रिक-कर्मचारिणां सेवाकालावधौ एकवर्षीयः सेवाविस्तारः प्रदत्तः। एतेषां कर्मचारिणां सेवा-कालः १ अक्टूबर २०२६ दिनाङ्कात् ३० सितम्बर २०२७ दिनाङ्कं यावत् संवर्धितः। वित्त-विभागस्य पूर्व-स्वीकृत्या अनन्तरं जलशक्तिविभागस्य अतिरिक्तसचिवेन प्रमुख-अभियन्तुः संस्तुत्या सह औपचारिक-आदेशः निर्गमितः। सेवाविस्तारं लब्धवत्सु कर्मचारिषु 'नाइलिट-शिमला' माध्यमेन बाह्यस्रोत-आधारे नियुक्ताः तान्त्रिक-सहायता-कर्मिणः सह सङ्गणकचालकाः १२२ तान्त्रिक-सहायता-कर्मिणः सह दत्तप्रविष्टिचालकाः २ जल- जीवन- मिशन- अन्तर्गताः दत्त-प्रविष्टि-चालकाः लेखापालाश्च २६८ कर्मचारिणः सम्मिलिताः सन्ति।

**कर्मचारिणां हिताय सर्वकारस्य प्राथमिकता**

एतेषां कर्मचारिणां माध्यमेन विभागे दत्त-प्रबन्धनं, देयक-निर्माणं, निरीक्षणं, तान्त्रिक-साहाय्यं, तथा च 'जल-जीवन-मिशन'-सम्बद्धानि विविधानि महत्त्वपूर्ण-कार्याणि सम्पाद्यन्ते। वित्त-विभागस्य व्यय-नियन्त्रण-शाखया २५ सितम्बर २०२६ दिनाङ्के प्रदत्तायाः अनुमतेः आधारेण एव अयं निर्णयः गृहीतः। अयं सेवाविस्तारः 'हिमाचलप्रदेश- वित्तीय-नियमावली-२००९' इत्यस्याः प्रावधानानाम् अन्तर्गतं प्रवर्तिष्यते। विभागेन स्वकीये सम्बद्ध-आयव्ययक-शीर्षे धनस्य उपलब्धिः स्वयमेव निश्चेतव्या, अस्य कृते सर्वकारस्य पार्श्वे अतिरिक्त-धनस्य याचना न कर्तुं शक्यते। केन्द्र-प्रायोजित-योजनानां बहिःस्रोतो-कर्मचारिणां व्ययम् अपि विभागेन उपलब्ध-संसाधनेभ्यः एव वोढव्यं भविष्यति। अनेन जल-जीवनमिशने विभागस्य अन्य- तान्त्रिकप्रक्रियासु च कर्मचारिणां न्यूनाधिक्येन कार्य-बाधायाः सम्भावना न भविष्यति।

उपमुख्यमन्त्री मुकेश-अग्निहोत्री-महोदयः अवदत् यत् सर्वकारः कर्मचारिणां हितानां संरक्षणं तथा च जनहित-योजनानां निरन्तरतां प्राथमिकतां ददाति। सः समस्तान् अधिकारिणः कर्मचारिणश्च जलवितरण-व्यवस्थां, जल-शक्ति-विभागस्य समस्तानां प्रकल्पानां क्रियान्वयनं त्वरित-गत्या सम्पादयितुं समादिष्टवान्।

## हिमसंस्कृतवार्ताः, ईदरधीररजः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अमेरिकादेशस्य 'मिल्वौकी' नगरे रात्रौ होराद्वयं यावत् जनैः कश्चन विचित्रः नादः श्रुतः। केनचित् अपि तस्य कारणं न ज्ञातम्।

**नन्दिनी-** अहो, रहस्यमयः सः नादः! स्कॉटलैंड-देशस्य 'लोख-नेस'सरोवरे अपि काचित् विचित्रा घटना दृष्टा। सरोवरस्य अन्तर्जालमानचित्रे अज्ञात-जलचराणां समूहः दृष्टः। केनचित् नाविकेन च तत्र मकरस्य शिरः अपि दृष्टम्।

**काव्या-** तत्र पूर्वम् अपि अनेकानि रहस्यानि दृष्टानि! अमेरिकादेशस्य 'जूवेल्'गुहायाम् अपि कश्चन विचित्रः प्राणी चित्रे गृहीतः। सः प्राणी कः इति विशेषज्ञैः अपि न निश्चितम्।

**नन्दिनी-** तस्य प्राणिनः रूपं विशेषज्ञैः न अवगतम्, तदेव आश्चर्यम्। अन्ते, 'अर्जेन्टीना'देशे आकाशे अपि आश्चर्यं दृष्टम्। विमानचालकेन आकाशे त्रीणि प्रकाशमानानि अज्ञातानि वस्तूनि दृष्टानि। तैः वस्तुभिः विमानम् अनुसृतम्।

**काव्या-** सत्यं, तैः वस्तुभिः वैमानिकः भीतः। अस्मिन् सप्ताहे खलु अनेकाः विचित्राः घटनाः लोके जाताः।

**नन्दिनी-** आम्, सत्यम् उक्तं त्वया। धन्यवादः।

# 'सीबीएसई'-विद्यालयेषु शिक्षक-नियुक्तये 'सीटेट' (CTET) अपि मान्यम्; हिमाचल- सर्वकारस्य प्रत्युत्तरानन्तरं उच्चन्यायालयेन निर्गतः महत्त्वपूर्ण- आदेशः




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-उच्चन्यायालयेन राज्यस्य शिक्षाविभागाय चयन-मण्डलेभ्यः एकः अतीव महत्त्वपूर्णः आदेशः निर्गमितः। उच्चन्यायालयेन स्पष्टीकृतं यत् 'केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड' सम्बद्धेषु राजकीय-विद्यालयेषु शिक्षकाणां नियुक्तये 'केन्द्रीय-शिक्षक-पात्रता-परीक्षा' पूर्णतया वैधा योग्यता वर्तते। केवलं 'हिमाचलप्रदेश- शिक्षक-पात्रता- परीक्षा' नास्ति इत्यस्मिन् आधारे कस्यापि अभ्यर्थिनः अभ्यर्थित्वं निरस्तीकर्तुं न शक्यते।

अयम् आदेशः न्यायाधिपतेः ज्योत्स्ना रिवाल दुआ महोदयायाः एकलन्यायपीठेन माधव-महाराजशर्मणा प्रविष्टायाः याचिकायाः अन्तिमनिस्तारणं कुर्वत्या श्रावितः। याचिकाकर्त्री १६ अप्रैल २०२६ दिनाङ्के विज्ञापिते शिक्षक-समाजशास्त्रविषये आवेदनं कृतम् आसीत्। किन्तु 'हिमाचलप्रदेश- राज्य- चयन- आयोगेन' तस्य अभ्यर्थित्वम् एतत् प्रतिपाद्य निरस्तं यत् अन्तिमतिथेः (१४ मई २०२६) पूर्वं तस्य पार्श्वे एचपी-टेट प्रमाणपत्रं नासीत्। आयोगस्य तर्कः आसीत् यत् राज्यसर्वकारेण 'सीटेट' परीक्षा एचपी-टेट समकक्षा न स्वीकृता।

## उच्चन्यायालये आयोगस्य निर्णयस्य प्रत्याख्यानम्

आयोगस्य इमं निर्णयं याचिकाकर्त्री उच्चन्यायालये प्रत्यभिहितम्। प्रार्थी न्यवेदयत् यत् इयं नियुक्तिः विशेषरूपेण 'सीबीएसई' सम्बद्ध- राजकीय-विद्यालयानां कृते एव क्रियमाणा अस्ति। यतो हि याचिकाकर्त्री विज्ञापनस्य अन्तिम-तिथेः बहु-पूर्वं सीबीएसई-द्वारा आयोजिता 'सीटेट' (CTET) परीक्षा उत्तीर्णा कृता आसीत्, अतः सः अयोग्यः उद्घोषितुं न शक्यते।

## सर्वकारस्य स्वीकरणानन्तरं न्यायपीठस्य निर्णयः

प्रकरणे न्यायालयेन राज्य-सर्वकारस्य पार्श्वतः प्रत्युत्तरं याचितम् आसीत्। श्रवणकाले महाधिवक्त्रा न्यायालयः सूचितः यत् राज्यसर्वकारेण अस्मिन् शिक्षक-नियुक्ति-प्रकरणे 'सीटेट' परीक्षा वैधरूपेण अङ्गीकृता अस्ति। अनेन सहैव विद्यालय-शिक्षा-निदेशकस्य पक्षतः अपि न्यायालये लिखिताः निर्देशाः समुपस्थापिताः।

शिक्षाविभागेन स्वीकृतं यत् यतो हि सीबीएसईमण्डलं स्व-सम्बद्धविद्यालयेषु शिक्षकाणां नियुक्तये 'सीटेट' परीक्षां वैधां मन्यते, अतः केवलम् अस्य अभावात् अभ्यर्थिनः प्रक्रियातः बहिष्कर्तुं न शक्यन्ते। विभागेन इदमपि स्पष्टीकृतं यत् अर्थशास्त्र-वाणिज्य-टीजीटी (हिन्दी) इत्यादिषु अन्य-पदेषु अपि 'सीटेट' परीक्षायाः अङ्गीकरणाय निर्देशाः पूर्वमेव चयन-आयोगाय सम्प्रेषिताः सन्ति।

# नेरचौक- आयुर्विज्ञान- महाविद्यालयाय महदोपहारः, त्रयोविंशति-कोटि-रूप्यकाणां (२३) एमआरआई- यन्त्रस्य शुभारम्भः, 'पेट-स्कैन' विभागस्य च शिलान्यासः विहितः







**हिमसंस्कृतवार्ताः- मण्डी।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः मण्डी-मण्डलस्य नेरचौक-स्थिते श्रीलालबहादुरशास्त्री-राजकीय- आयुर्विज्ञान- महाविद्यालये चिकित्सालये च त्रयोविंशति-कोटि-रूप्यकाणां (२३ कोटि) परिव्ययेन निर्मितायाः 'एमआरआई' प्रणाल्याः तथा च २.२९ कोटि-रूप्यकाणां तृतीयक-कर्करोग-चिकित्सा-केन्द्रस्य, 'लाईनेक', 'सीटी-सिम्युलेटर' इति यन्त्राणां च लोकार्पणम् अकरोत्। सहैव तेन अस्मिन् आयुर्विज्ञान-महाविद्यालये एकपञ्चाशत्-कोटि-रूप्यकाणां (५१ कोटि) परिव्ययेन स्थाप्यमानस्य 'पीईटी-स्कैन' खण्डस्य शिलान्यासः अपि सम्पादितः।

तदनन्तरं मुख्यमन्त्रिणा महाविद्यालये प्राध्यापकसदस्यैः छात्रैश्च सह संवादः कृतः। अस्मिन् अवसरे सः प्रोक्तवान् यत् राज्ये स्वास्थ्यक्षेत्रस्य सुदृढीकरणं सर्वकारस्य प्रमुख-प्राथमिकतासु अन्यतमम् अस्ति। सर्वकारस्य एषः प्रयासः यत् प्रदेशस्य सर्वेषु आयुर्विज्ञान-महाविद्यालयेषु अत्याधुनिक- चिकित्सासुविधाः उपलब्धाः भवेयुः, येन सामान्यजनाः उत्तमोपचाराय स्वगृहात् दूरं गन्तुं न बाध्येरन्, स्थानीयस्तरे एव च तेभ्यः विशेषज्ञ-स्वास्थ्य-सेवाः प्राप्येरन्।

## सर्वेषु चिकित्सालयेषु अत्याधुनिक-स्वचालित- प्रयोगशालाः

मुख्यमन्त्रिणा सुक्खू-महोदयेन विज्ञापितं यत् प्रदेशस्य समस्तेषु आयुर्विज्ञान-महाविद्यालयेषु अत्याधुनिक-स्वचालित-प्रयोगशालाः स्थाप्यन्ते। एतासां प्रयोगशालानां माध्यमेन एकस्मात् एव रक्त-प्रतिदर्शात् विविधानि चिकित्सीय-परीक्षणानि कर्तुं शक्ष्यन्ते, येन रुग्णेभ्यः पुनः पुनः प्रतिदर्शदानस्य आवश्यकता न भविष्यति, परीक्षणप्रक्रिया च सुगमा प्रभावोत्पादिका च सम्पत्स्यते। सः अवदत् यत् 'आईजीएमसी शिमलायां' सर्वकारेण पूर्वमेव पेट-स्कैन-यन्त्रं स्थापितम् अस्ति, यत्र परीक्षणाय प्रतीक्षा-अवधिः प्रायः एक-मास-परिमिता वर्तते, यत्रैव 'एम्स नवदेहल्यां' रुग्णाः चतुरः मासान् यावत् प्रतीक्षां कुर्वन्ति।

## वैद्यानां छात्राणां च कृते विदेश-प्रशिक्षण- यात्रायाः विचारः

मुख्यमन्त्रिणा उल्लिखितं यत् राज्यस्य आयुर्विज्ञान- महाविद्यालयेषु अध्ययनरतानाम् 'एमबीबीएस'-छात्राणां प्राध्यापकानां च कृते विश्वे प्रवृत्तानाम् आधुनिकानां स्वास्थ्य-पद्धतीनाम् अवबोधनाय वैदेशिक-प्रशिक्षण-यात्रासु प्रेषणाय सर्वकारः विचारं करोति। अनेन छात्राः चिकित्सकाश्च अन्ताराष्ट्रिय- स्तरीय- चिकित्सा-पद्धतीनां तन्त्रांशानां च प्रत्यक्षम् अनुभवं लप्स्यन्ते। सः प्रत्यपादयत् यत् सर्वकारः प्रत्येकस्मिन् महाविद्यालये प्राथमिकतया न्यूनातिन्यूनं द्वौ त्रयो वा प्रमुखविभागाः अतीव सुदृढाः कुर्यात्, येन विशिष्टचिकित्सायाः सामर्थ्यं वर्धेत।

नेरचौक-चिकित्सा-महाविद्यालयस्य व्यवस्थायाः विषये वदन् मुख्यमन्त्री प्राकटयत् यत् अत्र साम्प्रतं १२३ परिचारिकाः नियुक्ताः सन्ति, आगमिष्यति काले आवश्यकतानुगुणं नूतनानां परिचारिकाणां नियुक्तिः अपि विधास्यते। सः महाविद्यालये गहन-चिकित्सा-कक्षस्य सामर्थ्यं वर्धयितुं पञ्चविंशतितः-त्रिंशत् (२५-३०) अतिरिक्त-शय्यानां प्रस्थापनम् अपि उद्घोषितवान्, येन गम्भीर-रुग्णानाम् उपचारे महती सुविधा भविष्यति।



# महावीरमन्दिरस्य 'विष्णुरसोई' प्रारब्धा, पितृपक्षे पिण्डदानकर्तृभ्यः प्राप्स्यते निःशुल्कं भोजनम्

**पाटलीपुत्रम्/गया।**
**हिमसंस्कृतवार्ताः राघव नाथ झा**

पितृपक्षे गयातीर्थम् आगच्छतां लक्षाधिकानां पिण्डदानकर्तृणां भक्तानां च सौकर्याय 'श्री महावीर स्थान न्यास समिति, पटना' इत्यनया संस्थया सततं द्वितीये वर्षे 'विष्णुरसोई' इति सेवायाः शुभारम्भः कृतः। इयं निःशुल्कभोजनसेवा विष्णुपदमन्दिरस्य समीपे २५ सितम्बरतः १० अक्टूबर २०२६ पर्यन्तं प्रचालयिष्यते, येन पूजार्चनानन्तरं पिण्डदानाच्च परं भक्तेभ्यः शुद्धं भोजनं सरलताया प्राप्येत।

विष्णुरसोय्याः उद्घाटनं शनिवासरे श्रीमहावीरस्थानन्याससमित्याः सचिवेन सायण-कुणालेन विहितम्। अस्मिन् अवसरे संसद्-सदस्या शाम्भवी चौधरी, गया-मण्डलस्य मण्डलाधिकारी (DM) शशाङ्क शुभङ्करः, बिहार-राज्य-धार्मिक-न्यास-पर्षदः प्रतिनिधयः तथा च समित्याः पदाधिकारिणः कर्मकराश्च उपस्थिताः आसन्।

समित्यानुसारं पितृपक्षे देशस्य विविधभागेभ्यः सहस्रशः भक्ताः स्वपितॄणां तृप्तये पिण्डदानार्थं गयां प्राप्नुवन्ति। अस्मिन् समये भोजनस्य व्यवस्था एका महती आवश्यकता भवति। एतम् एव उद्देश्यं मनसि निधाय विष्णुपदमन्दिरस्य समीपे भोजनशाला स्थापिता, यत्र कोऽपि भक्तः निःशुल्कं भोजनं ग्रहीतुं शक्नोति। महावीरस्थानन्याससमितिः पूर्वमेव अयोध्यायां 'रामरसोई' तथा च सीतामढ्यां 'सीतारसोई' इत्येतयोः सञ्चालनं करोति। २०२५ तमे वर्षे पद्मश्री-आचार्यकिशोरकुणालस्य स्मृतौ गयायां 'विष्णुरसोई' इति सेवा प्रारब्धा आसीत्, या अस्मिन् वर्षेऽपि निरन्तरं प्रचलति।

समित्याः सचिवः सायण-कुणालः अवदत् यत् सेवा, श्रद्धा, जनकल्याणं च भारतीयसनातनपरम्परायाः मूलतत्त्वानि सन्ति। पितृपक्षे भक्तानां सेवाकरणं पितॄन् प्रति श्रद्धायाः अभिव्यक्त्या सह समाजं प्रति कर्तव्यपालनस्य अपि साधनम् अस्ति। समित्या पितृपक्षे गयातीर्थम् आगच्छन्तः सर्वे पिण्डदानकर्तारः भक्ताश्च विष्णुरसोय्याः अस्याः निःशुल्कसेवायाः लाभं स्वीकुर्वन्तु इति अभ्यर्थना कृता।

# इतिहासविभागे विद्यार्थी- मार्गदर्शन- विकास- प्रकोष्ठस्य च स्थापना





**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा**

सरदारपटेल- विश्वविद्यालय मण्डी इत्यस्य इतिहासविभागेन विद्यार्थिनां शैक्षणिक- भावीशोध- मानसिकस्वास्थ्य- समग्रव्यक्तित्वविकासानां च ध्यानं कृत्वा विद्यार्थी मार्गदर्शन विकास प्रकोष्ठस्य च स्थापना कृता अस्ति। विभागाध्यक्षः डॉ. राकेशकुमारशर्मा महोदयः सूचितवान् यत् अयं प्रयासः विश्वविद्यालयस्य माननीयस्य कुलपतेः आचार्यस्य ललितकुमार अवस्थीमहोदयस्य निर्देशानां, छात्र- मानसिकस्वास्थ्य- आत्महत्यानिवारणसमितेः निर्देशानुरूपेण कृतः अस्ति। अस्मिन् सन्दर्भे कुलपतिः आचार्यः ललितकुमार अवस्थीमहोदयः अवदत् यत् गुरु-शिष्यव्यवस्थायाः माध्यमेन विद्यार्थिनां शिक्षकानां च मध्ये निरन्तरः सकारात्मकः संवादः स्थापितः भविष्यति। अनेन विद्यार्थिनां शैक्षणिककाठिन्यानां वृत्तिसम्बन्धि- जिज्ञासानां व्यक्तिगत- भावनात्मक- आवश्यकतानां समये एव अवगमने उचितमार्गदर्शनप्रदाने च साहाय्यं प्राप्स्यते। सः विशेषरूपेण अवदत् यत् विद्यार्थिनां समस्याः संवेदनशीलता, गोपनीयता, मानवीयदृष्टिकोणैः सह अवगन्तुम् आवश्यकम् अस्ति। सः अपेक्षाम् अकरोत् यत् आचार्याः विद्यार्थिभिः सह नियमितसंवादं कुर्युः आवश्यकतायाम् च विश्वविद्यालयस्य सम्बद्ध समितिभिः सह समन्वयम् स्थापयेयुः। सः विभागम् अस्य प्रयासस्य सफल- क्रियान्वयनाय शुभकामनाः यच्छन् अवदत् यत् सशक्ताः विद्यार्थिनः एव सशक्तविश्वविद्यालयस्य विकसितसमाजस्य च आधारशिला सन्ति। प्रकोष्ठस्य व्यवस्थायाः अन्तर्गतम् इतिहासविभागस्य विभागाध्यक्षः डॉ. राकेशकुमारशर्मा अध्यक्षः, विकेशकुमारः समन्वयकः, डॉ. रामपालः, राजेशशर्मा, कृष्णचन्दः च सदस्याः नियुक्ताः सन्ति। विभागस्य विद्यार्थिनः विभिन्न समूहेषु विभज्य तेभ्यः नियमितमार्गदर्शनं प्रदास्यते। विभागाध्यक्षः डॉ. राकेशकुमारशर्मामहोदयः अवदत् यत् अस्य प्रयासस्य उद्देश्यं विद्यार्थिभ्यः न केवलं शैक्षणिक मार्गदर्शनं प्रदातुम् अस्ति अपि तु तान् आत्मविश्वाशिनः उत्तरदायिनः संवेदनशीलान् समग्ररूपेण विकसितव्यक्तित्वरूपेण च सज्जीकर्तुम् अनुकूलं शैक्षणिकवातावरणम् उपलब्धयितुम् अस्ति। अस्याः व्यवस्थायाः अन्तर्गतं प्रत्येकं गुरुणा स्व विद्यार्थिभिः सह प्रत्येक सप्ताहे न्यूनतिन्यूनम् एक वारं संवादः विधास्यते। विद्यार्थिनां शैक्षणिक- प्रगतेः उपस्थित्याः अन्य- आवश्यकतानां च मासिकी समीक्षा भविष्यति, प्रत्येकमासस्य पञ्चदशदिनाङ्के प्रतिवेदनं विभागाध्यक्षस्य माध्यमेन सम्बद्धसमित्यै प्रस्तोष्यते। उपवेशने इतिहासविभागस्य सर्वे आचार्याः स्नातकोत्तर- विद्यार्थिनः च उपस्थिताः आसन्।

# भारतीयसंस्कृतौ आभूषणानां प्रासङ्गिकता तथा वैज्ञानिकता विषये विशिष्टं व्याख्यानम्



**हिमसंस्कृतवार्ताः- लखनऊ, उत्तरप्रदेशः।**

अखिलभारतीय- संस्कृतपरिषदः, लखनऊ इत्यस्य तत्त्वावधाने शनिवारं 'भारतीयसंस्कृतौ आभूषणानां प्रासङ्गिकता, वैज्ञानिकता च' इति विषये विशिष्टव्याख्यानस्य आयोजनं सम्पन्नम्। कार्यक्रमे महिला- महाविद्यालयस्य, लखनऊ नगरस्य संस्कृतविभागस्य वरिष्ठप्राध्यापिका डॉ. ऋतूसिंहः मुख्यवक्त्रीरूपेण उपस्थिताऽभवत्।

मुख्यवक्त्री डॉ. ऋतूसिंहेन भारतीयसंस्कृतौ आभूषणानां महत्त्वं विशदीकृतम्। तया प्रतिपादितं यत् भारतीयपरम्परायां आभूषणानि केवलं शृङ्गारस्य साधनानि न सन्ति, अपि तु सौन्दर्यबोधेन सह सांस्कृतिकपरम्परायाः स्वास्थ्यसम्बद्ध- मान्यतानां च समन्वयं धारयन्ति। मांगटीका, कर्णपुष्पं, नासिकाभूषणं, वलयाः, नूपुराः, पादाभूषणम् इत्यादीनां पारम्परिकाभरणानां विषये तया विविधाः मान्यताः प्रस्तुताः। आयुर्वेदे तथा भारतीयपरम्परायां धातूनां प्रयोगस्य महत्त्वमपि तया प्रतिपादितम्। मुख्यातिथिः प्रो. हरिशङ्करमिश्रः, पूर्वाचार्यः, हिन्दीविभागः, लखनऊविश्वविद्यालयः, भारतीयभाषाणां विकासे संस्कृतस्य महनीयां भूमिकां प्रतिपादितवान्। तेन केशवः, माधवः इत्यादीनां शब्दानां भाषिकं सांस्कृतिकं च वैशिष्ट्यं प्रकाशयता हिन्दी- संस्कृतयोः मणिकाञ्चनयोगस्य महत्त्वं प्रतिपादितम्। परिषदः मन्त्री प्रो. प्रयागनारायणमिश्रः वाचिकस्वागतं कृत्वा विषयस्य सारगर्भितां प्रस्तावनां प्रस्तुतवान्। कार्यक्रमस्य अध्यक्षतां परिषदः अध्यक्षः डॉ. चन्द्रभूषणत्रिपाठी अकरोत्। सः भारतीयसंस्कृतौ आभूषणानाम् अस्तित्वस्य वैशिष्ट्यं तेषां सांस्कृतिकमहत्त्वं च विशेषतया प्रकाशयत्। कार्यक्रमे लखनऊविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः प्रो. अभिमन्युसिंहः, डॉ. गौरवसिंहः, डॉ. कुसुमसिंहः, डॉ. बिधुदत्तपाण्डेयः, कानपुरस्य पूर्वकारागाराधीक्षकः च विशेषरूपेण उपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं परिषदः संयुक्तमन्त्री डॉ. अनिलकुमारपोरवालः कृतवान्। कार्यक्रमस्य संयोजिका डॉ. पत्रिकाजैन आसीत्। वैदिकमङ्गलाचरणं मुकेशकुमारेण, लौकिकमङ्गलाचरणं सिन्धुपटेल द्वारा तथा स्वागतगीतं कीर्ति समरीता यादव च प्रस्तुतम्। धन्यवादज्ञापनं लखनऊविश्वविद्यालयस्य संस्कृत- प्राकृतभाषाविभागाध्यक्षः प्रो. अभिमन्युसिंहः कृतवान्। प्रभवपाण्डेयेन शान्तिपाठः प्रस्तुतः तथा सर्वैः समवेतस्वरेण शान्तिपाठेन कार्यक्रमस्य समापनम् अभवत्। आयोजने संस्कृत- ज्योतिषविभागयोः शोधच्छात्रैः सह पञ्चाशदधिकाः श्रोतारः उपस्थिताः आसन्।

# प्रधानमन्त्री मोदी

## आकाशवाण्याः 'मन की बात' कार्यक्रमेण जनैः सह विचारान् संविभजिष्यति




प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः एकादशवादने आकाशवाण्याः स्वकीये मासिके रेडियो-कार्यक्रमे 'मन की बात' इत्यस्मिन् देशविदेशयोः जनैः सह स्वविचारान् संविभजिष्यति। अयम् अस्य कार्यक्रमस्य अष्टत्रिंशदधिकशततमः (१३८ तमः) पर्यायः भविष्यति। अयं कार्यक्रमः समग्र- आकाशवाणी-दूरदर्शन-जाले (नेटवर्क), एआईआर-न्यूज-जालपुटे, 'न्यूज ऑन एआईआर' इति चलदूरभाष-अनुप्रयोगे (मोबाइल-एप) च प्रसारयिष्यते। एआईआर-न्यूज, डीडी-न्यूज, पीएमओ तथा सूचना-प्रसारण-मन्त्रालयस्य यूट्युब-वाहिन्याम् (चैनल) अपि अस्य प्रसारणम् भविष्यति। आकाशवाण्याः हिन्दी- प्रसारणस्यानन्तरमेव प्रादेशिकभाषास्वपि अयं कार्यक्रमः प्रसारयिष्यते।

# पञ्चचत्वारिंशद्-दिवसीये विशेष-अभियाने क्षेत्रं गच्छन्तु

## अधिकारिणः, मृत-जमाबन्दी-धारकाणां कुर्वन्तु अभिज्ञानम् : जायसवालः





**पाटलीपुत्रम्, २६ सितम्बर।**
**हिमसंस्कृतवार्ताः राघव नाथ झा**

राजस्व-(सर्वेक्षण)-प्रशिक्षण-संस्थाने शास्त्रीनगरे शनिवासरे भूमिसुधार-उपसमाहर्तॄणां समीक्षा-उपवेशने राजस्व-भूमिसुधार-मन्त्री डॉ. दिलीप-कुमार-जायसवालः पञ्चचत्वारिंशद्-दिवसीयस्य (४५) जमाबन्दी-सुधारस्य उत्तराधिकार-नामान्तरण-अभियानस्य च साफल्यप्रदापनाय अधिकारिभ्यः क्षेत्रे गत्वा कार्यकरणस्य निर्देशम् अदात्। उपवेशनस्य अध्यक्षतां विभागस्य सचिवः जय-सिंहः सीमा-त्रिपाठी च अकुरुताम्।मन्त्री अवदत् यत् इदम् अभियानं रैयतानां (कृषकाणाम्/स्वामिनाम्) विभागे विश्वासं दृढीकर्तुं सुवर्णम् अवसरम् अस्ति। सः अधिकारिभ्यः प्रातः-सायं च अभियानस्य पर्यवेक्षणम्, अञ्चल-कार्यालयानां नियमित-निरीक्षणम्, वर्षद्वयात् अधिकानां पुरातन-प्रकरणानां निस्तारणम्, आदेशानां सद्यः अन्तर्जाल-पटले (portal) आरोपणं तथा च निस्तारणस्य गुणवत्ता-संवर्धनं कर्तुं दिशानिर्देशान् अयच्छत्।

### रैयतेभ्यः आवेदनं न स्वीक्रियते, विभागः स्वयमेव करिष्यति पहलम्

सचिवः जय-सिंहः स्पष्टम् अकरोत् यत् विशेष-अभियानस्य अवधौ जमाबन्दी-सुधारार्थं रैयतेभ्यः किमपि आवेदनं न स्वीक्रियते। विभागः समुपलब्ध-अभिलेखैः सङ्गणकीय-अभिलेखैः (digital records) च आधृत्य स्वयमेव पहलम् उपक्रम्य सुधारं विधास्यति।
सः ग्रामप्रधानैः (मुखिया), पञ्चायत-सरपञ्चैः, वॉर्ड-सदस्यैः, पञ्चैश्च सह उपवेशनं कृत्वा मृत-जमाबन्दी-धारकाणाम् अभिज्ञानं क्रियेत इति तथा च प्रतिदिनं राजस्व-कर्मचारिणः ग्रामेषु (मौजासु) सम्प्रेष्य उत्तराधिकार-जमाबन्दी-सम्बन्धीनां प्रकरणानां प्रमाणीकरणं कारयेयुः इति निर्देशान् अददात्।

### विलुप्त-(मिसिंग)-जमाबन्दीनां सर्वेषां रिक्त-स्थानानां पूरणं मुख्यं लक्ष्यम्

सचिवः न्यवेदयत् यत् सर्वेभ्यः अञ्चलाधिकारिभ्यः विलुप्त-(मिसिंग)-जमाबन्दीनां नामावली प्रदत्ता अस्ति। अस्यां सूच्याम् अङ्कितानां प्रत्येकस्य रिक्त-प्रविष्टीनां पूरणम् अभियानस्य प्रमुखं लक्ष्यम् अस्ति। सः अभियानस्य मन्दगतौ असन्तोषं प्रकटयन् त्वरिततया गतिवर्धनार्थं समादिष्टवान्।

### वर्षैकात् पुरातनानि न्यायालय-प्रकरणानि भविष्यन्ति निस्तारितानि

उपवेशने आर.सी.एम.एस.-जालपटले (RCMS portal) प्रलम्बितानां प्रकरणानां समीक्षां कुर्वता वर्षैकात् अधिकानां पुरातनानां सर्वेषां न्यायालय-प्रकरणानां शीघ्रातिशीघ्रं निस्तारणाय समादेशः दत्तः। अनेन सहैव न्याय-प्रक्रियायाः सम्पूर्णतया अन्तर्जालीकरणं (online), भू-अभिलेख-जालपटलात् प्रामाणिक-प्रतिलिपि-प्रदानं तथा च अङ्कीय-भिन्न-दस्तावेज-व्यवस्थायाः (offline) परिसमापनं कर्तुमपि बलं दत्तम्।अस्मिन् उपवेशने अपर-सचिवः डॉ. महेन्द्र-पालः, संयुक्त-सचिवः डॉ. सुनील-कुमारः, सञ्जय-कुमार-सिंहः, उपनिदेशकः मोना-झा इत्यादयः विभागस्य अन्ये वरिष्ठाधिकारिणः समुपस्थिताः आसन्।

# पूर्व-मध्य-रेलविभागस्य महाप्रबन्धिका धनबाद-मण्डलस्य अङ्गारक-उपपथानां निरीक्षणम् अकरोत्, एनटीपीसी-एनसीएल-अधिकारिभिः सह उपवेशनम्





**पाटलीपुत्रम्/हाजीपुरम्, २६ सितम्बर।**
**हिमसंस्कृतवार्ताः राघव नाथ झा**

पूर्व-मध्य-रेलविभागस्य महाप्रबन्धिका डिम्पी-गर्गः शनिवासरे धनबाद-मण्डलस्य शक्तिनगर–कृष्णशिला–महदिया–सिङ्गरौली–ओबरा-जलबन्धः इति रेल-खण्डस्य विविधानाम् अङ्गारक-उपपथानां (कोल-साइडिंग्-स्थानानां) च निरीक्षणं व्यदधात्। अस्मिन् अवसरे सा रेल-संरक्षणस्य, पण्य-वहनस्य (माल-ढुलाई), अङ्गारक-परिवहनस्य च व्यवस्थायाः समीक्षां कुर्वती एनटीपीसी (NTPC) तथा च 'नॉर्दर्न-कोलफील्ड्स-लिमिटेड' (NCL) इत्येतयोः प्रतिष्ठानयोः अधिकारिभिः सह उच्चस्तरीयम् उपवेशनम् अकरोत्। निरीक्षणकाले महाप्रबन्धिका रेल-खण्डस्य सेतूनाम्, उपरिगामि-विद्युतीकरण-व्यवस्थायाः (OHE), लोहपथस्य (रेल-ट्रैक) च संरक्षणदृष्ट्या स्थितिं परीक्षितवती। एनटीपीसी-विन्ध्याचल-सिङ्गरौली-अधिकारिभिः सह सञ्जाते उपवेशने खनिभ्यः उत्तम-रेल-संयोजनस्य, सुगम-सुरक्षित-पण्य-परिवहनस्य, परिचालन-दक्षता-संवर्धनस्य च विषये विस्तृता चर्चा अभवत्। कृष्णशिला-स्थानकस्य दिग्वर्तक-सन्धेः (पॉइण्ट्-क्रॉसिंग्) च निरीक्षणं कृत्वा सा परिचालन-व्यवस्थायाः समीक्षां विहितवती, अधिकारिभ्यश्च सुरक्षित-रेल-सञ्चालनार्थं निर्देशान् अयच्छत्। तदनन्तरं महदिया-अङ्गारक-उपपथे पण्य-पूरणस्य परिचालन-व्यवस्थायाश्च अवलोकनं विधाय निर्बाधतया अङ्गारक-परिवहनं सुनिश्चितीकर्तुं बलं दत्तवती। महाप्रबन्धिका सिङ्गरौली-स्थानके यात्रिसुविधानां परिचालन-व्यवस्थायाः तथा च ओबरा-जलबन्ध-स्थानकस्य रेल-सञ्चालन-प्रणाल्याः अपि निरीक्षणम् अकरोत्। एनसीएल-अधिकारिभिः सह उपवेशने अङ्गारक-परिवहनस्य, पण्य-वहनस्य सौकर्यस्य, रेल-परिवहन-क्षमता-संवर्धनस्य च उपायानां विषये सकारात्मकः विचार-विमर्शः जातः। अस्मिन् निरीक्षणकाले धनबाद-मण्डलस्य मण्डल-रेल-प्रबन्धकः अखिलेश-मिश्रः, प्रधान-कार्यालयस्य मण्डलस्य च अन्ये वरिष्ठाधिकारिणः उपस्थिताः आसन्।

# गोलघर-विद्यालये भाजपायाः 'मम स्वप्नानां भारतम्' चित्राङ्कन-कार्यक्रमः, बालकैः सह अमिलत् सञ्जय-सरावगी





**पाटलीपुत्रम्, २६ सितम्बर।**
**हिमसंस्कृतवार्ताः राघव नाथ झा**

भारतीयजनतापार्ट्याः 'सेवासङ्कल्प-अभियानस्य' अन्तर्गतं शनिवासरे पाटलीपुत्रस्य गोलघरस्थे कन्या-मध्य-विद्यालये गोलघर-उद्याने 'मम स्वप्नानां भारतम् : सेवाचित्रम्' इति कार्यक्रमः आयोजितः। कार्यक्रमे भाजपायाः प्रदेशाध्यक्षः सञ्जय-सरावगी शालेयबालकैः सह मेलनं कृत्वा तैः विरचितानां चित्राणाम् अवलोकनम् अकरोत्, तेषां सृजनात्मक-अभिव्यक्तेः प्रशंसां च विहितवान्।कार्यक्रमावसरे बालकाः वर्णानां माध्यमेन २०४७ तमवर्षस्य भारतम्, विकसितराष्ट्रम्, आत्मनिर्भरता, स्वच्छता, शिक्षा, सामाजिकप्रगतिः इत्यादिषु विषयेषु स्वकल्पनाः चित्रेषु समुपस्थापयन्। सरावगी बालकैः सह तेषां चित्राणां विषये वार्तालापम् अकरोत् तेषां विचारांश्च अशृणोत्। सञ्जय-सरावगी अवदत् यत् बालकानां चित्रेषु विकसितस्य आत्मनिर्भरस्य च भारतस्य सम्बन्धे तेषां दृष्टिः, आशा, विश्वासश्च दृश्यते। तस्यानुसारं २०४७ वर्षपर्यन्तं 'विकसितभारतम्' इति सङ्कल्पं साकारीकर्तुं बालकानां युवानां च महती भूमिका भविष्यति।

सः एतदपि अकथयत् यत् 'सेवासङ्कल्प-अभियानस्य' माध्यमेन समाजस्य विविधवर्गेषु सेवायाः, संवेदनायाः, राष्ट्रनिर्माणस्य च भावं दृढीकर्तुं प्रयासाः क्रियन्ते। अनेन सहैव सः प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे देशः विकसितभारतस्य लक्ष्यं प्रति अग्रेसरः अस्ति इत्यपि अवदत्। अस्मिन् कार्यक्रमे विद्यालयस्य प्रधानाचार्यः अनिल-कुमारः, भाजपायाः प्रदेशोपाध्यक्षः सन्तोष-पाठकः, शीला-कुशवाहा, पटना-महानगर-जिला-महामन्त्री अजीत-कुमार-लाली, युवामोर्चायाः उपाध्यक्षः अभिषेक-कुमार-बंटी तथा च विद्यालयस्य शिक्षकाः उपस्थिताः आसन्।





# अभिभावक-शिक्षक-सङ्गमे मुख्यमन्त्री बालकान् अवदत्— दत्तचित्ताः भूत्वा पठन्तु, अग्रिमवर्षात् सर्वकारीय-विद्यालयेषु सङ्गणक-शिक्षायाः सज्जता

**पाटलीपुत्रम्, २६ सितम्बर।**
**हिमसंस्कृतवार्ताः राघव नाथ झा**

मुख्यमन्त्री सम्राट्-चौधरी शनिवासरे दानापुरस्य बाटागञ्जस्थे राजकीय-मध्य-विद्यालये रामजीचके आयोजिते अभिभावक-शिक्षक-सङ्गमे (पी.टी.एम्.)-२०२६ सम्मिलितवान्। सः विद्यार्थिभिः, अभिभावकैः, शिक्षकैश्च सह सम्भाषणं कृत्वा विद्यालयस्य शैक्षणिक-व्यवस्थायाः, उपस्थितेः, परीक्षा-परिणामानां, शिक्षायाः गुणवत्तायाश्च समीक्षां व्यदधात्।
मुख्यमन्त्री अवदत् यत् अभिभावक-शिक्षक-सङ्गमस्य मुख्यम् उद्देश्यं सर्वकारीय-विद्यालयेषु गुणवत्तापूर्णायाः शिक्षायाः प्रसारः, शतप्रतिशतम् उपस्थितिः, अभिभावक-शिक्षकाणां मध्ये नियमित-संवादस्य दृढीकरणं च अस्ति। सः छात्रेभ्यः प्रतिदिनं विद्यालयम् आगन्तुम्, गृहकार्यं कर्तुम्, दूरभाष-यन्त्रस्य (मोबाइल्) सीमित-उपयोगं विधातुम्, नवति-प्रतिशतात् (90%) अधिकानाम् अङ्कानां सम्प्राप्तेः लक्ष्यं निर्धार्य अध्ययनं कर्तुं च आह्वानम् अकरोत्।

## 'सेवा-चित्रे' बालकानां कल्पनाशक्तेः प्रशंसा

कार्यक्रमे मुख्यमन्त्री 'मम स्वप्नानां भारतम्-सेवा-चित्रम्' इति राज्यव्यापि-प्रतिस्पर्धायाः अन्तर्गतं बालकैः रचितानां विकसितभारतम्-२०४७, सौर-ऊर्जा, मेट्रो-रेलयानम्, रोबोट् (यन्त्रमानवः), स्वप्नानां भारतम् इत्यादिविषयक-चित्राणाम् अवलोकनम् अकरोत्, छात्र-छात्राणां विचारान् अपि अशृणोत्।

## सङ्गणक-शिक्षायाः अनिवार्यतायै सज्जता

मुख्यमन्त्री शिक्षण-विभागं समादिशत् यत् आगामिनः शैक्षणिक-सत्रात् सर्वेषु सर्वकारीय-विद्यालयेषु सङ्गणक-शिक्षायाः (कम्प्यूटर-शिक्षायाः) व्यवस्थां प्रदातुं योजना सज्जीक्रियताम्। सः प्रति-द्वित्रि-विद्यालयेषु एकस्य सङ्गणक-प्रशिक्षकस्य व्यवस्थां कर्तुं तथा च आदर्श-विद्यालयेषु (मॉडल्-स्कूल) अन्तर्जाल-माध्यमेन शिक्षण-व्यवस्थां (ऑनलाइन-शिक्षणम्) अधिक-प्रभाविनीं विधातुं बलं दत्तवान्।अस्मिन् कार्यक्रमे शिक्षामन्त्री मिथिलेश-तिवारी, सहकारितामन्त्री रामकृपाल-यादवः, शिक्षण-विभागस्य सचिवः राजीव-रोशनः, मण्डलाधिकारी (DM) कुन्दन-कुमारः, वरिष्ठ-आरक्षकाधीक्षकः (SSP) कार्तिकेय-के.-शर्मा तथा च विद्यालयस्य शिक्षकाः, छात्र-छात्राः, अभिभावकाश्च समुपस्थिताः आसन्।

# भारत-नेपाल-सीमायां चौरप्रवेशम्, कूटलेख्यम्, अवैधवाणिज्यं च रोद्धुं केन्द्र-बिहार-सर्वकारौ संयुक्तरूपेण कार्यं करिष्यतः



**पाटलीपुत्रम्, २६ सितम्बर। हिमसंस्कृतवार्ताः राघव नाथ झा**

मुख्यमन्त्रिणः सम्राट्-चौधरिणः अध्यक्षतायां मुख्यमन्त्रिसचिवालये स्थिते 'संवाद'-भवने शनिवासरे भारत-नेपाल-सीमासंरक्षणविषये उच्चस्तरीयं समीक्षा-उपवेशनम् अभवत्। अस्मिन् उपवेशने केन्द्रीय-गृहोपमन्त्री नित्यानन्द-रायः, उपमुख्यमन्त्री विजयकुमारचौधरी तथा च केन्द्रीय-राज्य-सुरक्षा-अभिकरणयोः वरिष्ठाधिकारिणः उपस्थिताः आसन्। मुख्यमन्त्री अवदत् यत् भारत-नेपाल-सीमायाः संवेदनशीलतां विभाव्य सशस्त्रसीमाबलम्, बिहार-आरक्षकदलम्, केन्द्रीय-अभिकरणानि च उत्तमेन समन्वयेन निरन्तरपर्यवेक्षणेन च कार्यं कुर्युः। सः चौरप्रवेशम् (अनाधिकृतप्रवेशम्), कूटलेख्यानाम् उपयोगम्, जालकमुद्राम् (कूटमुद्राम्), मादकद्रव्याणाम् अवैधवाणिज्यं तथा च अन्याः आपराधिकप्रवृत्तीः प्रभावीरीत्या रोद्धुं दिशानिर्देशान् अयच्छत्।उपवेशने सीमावर्तिप्रदेशानां वित्तकोशेषु जालकमुद्रापरिज्ञानयन्त्राणां लभ्यतां सुनिश्चितीकर्तुम्, सन्दिग्धवित्तीयव्यवहाराणाम् अप्रामाणिक-वित्तकोशलेखानां चाभिज्ञानं विधाय नियमानुसारेण विधिविधानं कर्तुमपि बलं दत्तम्। मुख्यमन्त्री केन्द्रसर्वकारस्य 'मादकद्रव्यमुक्तभारतम् २०२९' इति लक्ष्यस्यानुरूपं सीमाक्षेत्रेषु मादकद्रव्याणाम् अवैधवाणिज्यविरुद्धं कठोरकार्याचरणाय समादिशत्।सः अकथयत् यत् सीमावर्तिजनपदानां मण्डलाधिकारिणः आरक्षकाधीक्षकाश्च केन्द्रीयसुरक्षान्वेषणाभिकरणैः सह नियमितमासिकसमन्वयोपवेशनं कुर्युः। अनेन सहैव अपञ्जीकृतधार्मिकस्थलानामभिज्ञानं कृत्वा प्रचलितविध्यनुसारेण कार्याचरणं विधातुम्, सीमावर्तिप्रदेशेषु शिक्षाप्रभृतीनां मूलभूतसुविधानां सुदृढीकरणं कर्तुमपि निर्देशः प्रदत्तः। अस्मिन् उपवेशने मुख्यसचिवः प्रत्ययामृतः, आरक्षमहानिदेशिका प्रीतावर्मा, गृहविभागस्य प्रधानसचिवः पङ्कजकुमारः, विशिष्टशाखायाः (स्पेशल-ब्रान्च्-इत्यस्याः) महानिदेशकः कुन्दनकृष्णनः इत्यादयः विविधविभागानां केन्द्रीय-अभिकरणानां च वरिष्ठाधिकारिणः समुपस्थिताः आसन्। सीमावर्तिजनपदानां मण्डलाधिकारिणः आरक्षकाधीक्षकाश्च दूरदृश्यसम्पर्कमाध्यमेन उपस्थिताः अभवन्।

# सर्वेभ्यः राज्येभ्यः केन्द्रशासितप्रदेशेभ्यश्च 'एसआईआर' (SIR) आदेशः सर्वसम्मत्या निर्गतः : निर्वाचन-आयोगः

निर्वाचन-आयोगेन उक्तं यत् 'विशेष-गहन-पुनरीक्षण' (एसआईआर)-प्रक्रियायां येभ्यः जनेभ्यः सूचनापत्राणि (नोटिस) निर्गतानि सन्ति, तेषां गृहाणि गत्वा मतदानकेन्द्रस्तरस्य अधिकारिणः (बीएलओ) आवश्यकानि प्रमाणपत्राणि संगृहीष्यन्ति। पश्चात् बीएलओ-अधिकारिणः एतानि प्रमाणपत्राणि 'ईसीआईएनईटी' (ECINET) पटले आरोपयिष्यन्ति (अपलोड करिष्यन्ति)। अयं निर्णयः नवदेहल्याम् आयोगस्य उपवेशने स्वीकृतः। आयोगेन स्पष्टीकृतं यत् एतादृशान् जनान् निर्वाचकपञ्जीकरणाधिकारिणः श्रवणार्थं (सुनवाई कृते) न आह्वयिष्यन्ति। श्रवणं केवलम् असाधारणपरिस्थितिषु एव अन्तर्जालमाध्यमेन (ऑनलाइन) भविष्यति। यदि श्रवणम् आवश्यकं भवेत्, तर्हि मतदातृ-जनाः स्वपरिवारे कञ्चिदपि वयस्कसदस्यं स्वस्थाने उपस्थातुं प्राधिकर्तुं शक्नुवन्ति।बिहार-पश्चिमवङ्गाभ्यां सह विंशतौ राज्येषु केन्द्रशासितप्रदेशेषु च एसआईआर-कार्यं सम्पन्नम् अभवत्। आयोगेन पुनरुक्तं यत् सर्वेभ्यः राज्येभ्यः केन्द्रशासितप्रदेशेभ्यश्च एसआईआर-आदेशः आयोगस्य सर्वसम्मत्या एव निर्गतः आसीत्। आयोगेन सूचितं यत् येषां नामानि पुनरीक्षणे अवशिष्टानि सन्ति, ते यदि स्वनामानि योजयितुम् इच्छन्ति, तर्हि सम्बद्धस्य निर्वाचकपञ्जीकरणाधिकारिणः समीपे आवेदनं कर्तुं शक्नुवन्ति। मुख्यनिर्वाचनाधिकारिणः, मण्डल-निर्वाचनाधिकारिणः, निर्वाचक-पञ्जीकरणा-धिकारिणश्च एतेषां मतदातॄणां नामाङ्कनाय सद्यः एव विशेषामियानं प्रारप्स्यन्ते। मण्डलनिर्वाचनाधिकारिणः पर्याप्तसंख्यायां सहायताकेन्द्राणि स्थापयिष्यन्ति तथा च रात्रिकालीन-आश्रयेषु निवसतं जनानां, श्रमिकाणां, दीनानां, गृहहीनानां च कृते विशेषशिबिराणि आयोजयिष्यन्ति।निर्वाचन-आयोगेन निवेदितं यत् सर्वेभ्यः राज्येभ्यः केन्द्रशासितप्रदेशेभ्यश्च मतदातृसूचीनां विशेष-गहन-पुनरीक्षणस्य (एसआईआर) निर्णयः सर्वसम्मतः आसीत्। नवदेहल्यां माध्यमसम्बद्ध-महानिदेशकः आशीषगोयलः अवदत् यत् अद्य आयोगस्य उपवेशने मुख्यनिर्वाचनायुक्तः ज्ञानेशकुमारः तथा निर्वाचनायुक्तौ सुखबीरसिंहसन्धूः, विवेकजोशी च उपस्थिताः आसन्। सः न्यवेदयत् यत् गते वर्षे जूनमासस्य २४ दिनाङ्के बिहारराज्यम् आरभ्य सर्वेषां राज्यानां केन्द्रशासितप्रदेशानां च कृते निर्गतः एसआईआर-आदेशः आयोगेन सर्वसम्मत्या एव प्रसारितः आसीत्।

# तिङर्थवादस्य भावनाप्रत्ययार्थस्य च तुलनात्मकाध्ययने विद्यावारिधेः मौखिकी परीक्षा सम्पन्ना

## कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालये भारतेन्दु-झा-महोदयेन साफल्येन पूरिता विद्यावारिधि-(Ph.D.)-उपाधेः अन्तिमा शैक्षणिकी परीक्षा

**दरभङ्गा, हिमसंस्कृतवार्ताः राघव नाथ झा**

कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयस्य स्नातकोत्तर-व्याकरण-विभागे शोधच्छात्रस्य भारतेन्दु-झा-महोदयस्य विद्यावारिधि-(Ph.D.)-उपाधये मौखिकी परीक्षा (वाक्-परीक्षा) साफल्येन सम्पन्ना। भारतेन्दु-झा-महोदयस्य शोधविषयः "तिङर्थवादसार-भावनाप्रत्ययार्थत्वनिर्णययोः तुलनात्मकम् अध्ययनम्" इत्यासीत्। एष शोधः संस्कृतव्याकरणे तिङर्थवादस्य मीमांसासम्मत-भावनाप्रत्ययार्थस्य च शास्त्रीयावधारणानां तुलनात्मकं समीक्षात्मकं चाध्ययनम् उपस्थापयति। शोधकार्यमिदं विश्वविद्यालय-अनुदान-आयोगस्य (UGC) २०१६ तमवर्षस्य नियमानुसारेण सम्पन्नम्। शोधच्छात्रः दरभङ्गा-जनपदस्य जाले-प्रखण्डान्तर्गत-राढ़ी-ग्रामस्य (पत्रालयस्यापि) निवासी वर्तते। अस्य पञ्जीकरण-सङ्ख्या २३१९/२०२३ तथा च शोध-समर्पण-वर्षं २०२६ अस्ति। शोधकार्यमिदं भरतमिश्र-संस्कृत-महाविद्यालयस्य (छपरा) सह-प्राचार्यस्य डॉ. अम्बरीश-कुमार-मिश्रस्य निर्देशने पूर्णताम् अगमत्। मौखिकपरीक्षायाः बाह्यपरीक्षकैः बनारस-हिन्दु-विश्वविद्यालयस्य (वाराणसी) व्याकरणविभागाध्यक्षैः प्रो. शैलेश-कुमार-तिवारी-महोदयैः शोधस्य शास्त्रीयप्रामाणिकतायाः, तुलनात्मकपद्धतेः, मौलिकतायाः शोधदृष्टेश्च भूरिशः प्रशंसा कृता। अस्मिन् अवसरे व्याकरणविभागाध्यक्षाः डॉ. सीताचरण-झा-महोदयाः, पूर्वविभागाध्यक्षाः प्रो. दयानाथ-झा-वर्याः, डॉ. यादुवीर-स्वरूप-शास्त्रिणः, डॉ. रामसेवक-झा-महाभागाः, दर्शनसङ्कायाध्यक्षाः डॉ. शम्भुशरण-तिवारि-महोदयाः, डॉ. रितेश-कुमार-चतुर्वेदी, वरुण-कुमार-झा, डॉ. अवधेश-श्रोत्रियः, दिलीप-कुमार-झा तथा च साहित्यविभागाध्यक्षाः डॉ. सन्तोष-कुमार-पासवान-महोदयाः इत्यादयः विश्वविद्यालस्य बहवः आचार्याः शोधच्छात्राश्च उपस्थिताः आसन्। मौखिकपरीक्षायाः साफल्ये समुपस्थिताः विद्वांसः भारतेन्दु-झा-महोदयाय विद्यावारिधि-उपाधये शुभाशयान् प्रदत्तवन्तः, तस्य च समुज्ज्वल-शैक्षणिक-भविष्यस्य मङ्गलं कामितवन्तः।






**प्यार चन्द सिप्पी, पालमपुर**

आओ असां रळी-मिळी मनांणी एह सैर,
भोलेनाथ रखदे हन दुनियाँ दी खैर।
काळे मीहनें बरसाती दिंयाँ बरखाँ,
होंदियाँ नकसाने दिंयाँ चहुं पासे चरचां,
रित आई हुंणं सौंहणी करी इंतज़ार,
मुक्की गेया जळेया बरसाती दा कहर। आओ असां....

सैरी दी तियारियां राति ते होंणीयाँ,
धान, छल्ली,काकड़ी पटिया ते ल्योणिआँ।
कंधां पर लिखणे नां ते वचार,
रखणां घमीरड़ू भी लिखी करी सैर।आओ असां..
तड़के भ्यागा उठी नोहि-धोहि सारेयां,
याँणेयाँ स्यांणेयाँ बुजुर्गा बचारेयाँ।
सारे पकवान रखी पूजणी जे सैर,धू
प टिक्का करी फिरि बंदणें जे पैर।आओ असां.

बच्चेयाँ,जोआँनां खेडां जे पांणिआँ,
खोडाँ कनैं पैसे दियाँ मीरां लगाणिआँ।।
घर घर जाई खांणां थकदे नीं पैर,
पतरोड़ू बबरु गौंएं बगैर। आओ असां.......
घर घर नचणां,घर घर खाँणां, न
ची कुद्दी सारेयां खांणां पचांणां।
भांनें कन्ने पुछि औंणी सजणां दी खैर,
निहालपा च होई जांदी भ्यागा ते दपैहर।आओ असां....
बबरु,मिट्ठु, चिलड़ू खाई नी मुकदे,
भरोई जांदे ढिढ थोड़ा उरे परे सुटदे।
फिरि मिठी खीर बी तां लगदी एह जहर,
दुधे विच पांणी खूब मलांदे न मैहर।आओ असां.....

गुड्डीयाँ ते कौडियां ने देर रात खेलणां,
जाई करी फिरि खिंद खन्दोलुआँ च बेलणां।
टिकदे नि जुआई कई पैग्गे बगैर,
जचदी नि एह धियाँ ध्याणी बग़ैर। आओ असां...
तित्थ तोहार सब जींदआँ दी चनँणी,
मेरी बी एह गल सुणा तुसां गट्ठी बनँहणी।
पले दा भरोसा नि एह सांह दा बपार,
छडणें जे रोशे अळामें रखणें नि वैर। आओ असां......



# सैरा री सबीं जो बधाई

स्याळे री हुई गई शुरुआत
आई गई सैर फसल हुई गी त्यार
अपणियाँ दराटियाँ चंडाई लवा करी लवा तेज
बडणे जो नी हुण करा इन्तज़ार
गर्मी बी घटी गई
बरखां बी चकोई गईयाँ
धान घाह बडणे जो कने
छल्लियां खोटणे जो रई गईयाँ
कई जगह मेले लगदे
लोक लैंदे पूरी नंद
लदरौरा रे मेले जो जाणा जरूर
कम्म करी देणे सारे बन्द
काला मिहना हुई गया खत्म
नवियाँ ब्याईरियाँ हुण सौरियाँ रे जाणे जो त्यार
शिवजिये बी जटां कठियाँ करी लई
अंदर हुई जाने किड़ू मकोड़ू
सैजे कदके आइरे थे बाहर
फसला रा बी अया बुरा हाल
छल्लियां पईरी लमी क्या करनी बडाई
कुछ पंछिंएँ बांदरें नी छड्डी
कुछ सुअरें दिति री मुकाई
सैरी जो नाई राती
घरें घरें जांदे थे
नवियाँ फसलां जो टोकरिया च
सजाई कने ल्यान्दे थे
लोग बी पहले सैरी जो बड़ा थे मनान्दे
खरे खरे बधिया पकवान थे बणान्दे
सैरी माता अग्गे बड़ा कुछ थे चढान्दे
सेवईयां भल्ले कने खीर थे खूब खाँदे
हुण लोग सैर तां क्या सारे त्वाहर
बड़े घट मनान्दे
मनाणा क्या तन्जे टैम ई नियाँ किसिगे
फसलां बी हुण बड़ी घट बाहन्दे
पुन्या कने दूजी रा चंद्रमा देखी लयो
पत्थर चौथ भी कने कने ई आई
चौथी रा चंद्रमा बिल्कुल नी देखणा
सैरा री तुहांजो बौहत बौहत बधाई

**रवींद्र कुमार शर्मा घुमारवीं**
**जिला बिलासपर हि प्र**



# मण्डी च देवसमागम्

हिमसंस्कृतवार्ताः

छोटी काशी मण्डी सजी आज,
बणया बड्डा ही सुहणा काज।
सत्य साईं दा संदेश लैई करी,
संगत आई खुशियां भरी भरी।

छब्बी-सताई सितम्बर दा दिन आया,
देवसमागम रा रंग चोखा जमाया।
देव-धरती सारी धन्य होई गेई,
साईं दे प्रेमे च मगन होई गेई।

व्यास नदिए दा निर्मल पाणी,
सुणांदा साईं दी अमर कहाणी।
घंटे-शंखां री गूंजदी तान,
सबदे मनै च बसया भगवान।

प्रेम ते सेवा दा दित्ता पैगाम,
साईं दे चरणां च कोटि प्रणाम।
झूमदे सारे नर ते नारी,
बणी गेई महफिल सबते न्यारी।

एकता, भाईचारा दिलै
च बसाई लैणा,
साईं बाबा रा नाम
सदा ध्याई लैणा।
मण्डी नगरी च छाई
बरकत भारी,
साईं कृपा बरसी
आज प्यारी-प्यारी।